# संस्कृतवार्ता:

दिनाङ्क : 05/01/2025 सायम् - 06:20

**आदौ मुख्यवार्ताः**

· उत्तराखण्डे उत्तरकाशी-मण्डलान्तर्गतस्य धरली-ग्रामे अद्य खीरगंगा-नद्याः उपरि-जलग्रहणक्षेत्रे मेघ-विस्फोटेन समुत्पन्नस्य आकस्मिक-जलप्रलयस्य कारणेन बृहद्रूपेण विनाशः अभवत्। आपत्प्रबन्धन-दलानि स्थले उद्धार-कार्येषु सक्रियरूपेण संलग्नानि सन्ति ।

· प्रधानमन्त्री नरेन्द्रमोदी फिलीपीन्स-देशस्य राष्टर्पतिना मार्कोस्-जूनियर इत्यनेन सह द्विपक्षीयसम्वादं कृतवान् , प्रोक्तवान् यत् द्वावेव देशौ परस्पर-सहभागित्वं अग्रे नेतुं सहमते स्तः ।

· भारत-फिलिपीन्स-देशयोः मध्ये रणनैतिक-सहभागित्वम्, आपराधिकविषयेषु परस्परविधिसहाय्यं , रक्षा, विज्ञानप्रौद्योगिकी चेत्यादिषु क्षेत्रेषु सन्धिपत्राणि हस्ताक्षरितानि ।

· बिहारे विशिष्ट-गहन-संशोधनम् इति प्रकरणमधिकृत्य विपक्षिदलानां विरोध-प्रदर्शनानन्तरं द्वयोः एव सदनयोः कार्याचरणं स्थगितम् अभवत् ।

## अथ वार्ताः विस्तरेण

### उत्तराखण्ड-मेघविस्फोटनम्

उत्तराखण्डे उत्तरकाशी-मण्डलान्तर्गतस्य धरली-ग्रामे अद्य खीरगंगा-नद्याः उपरि-जलग्रहणक्षेत्रे मेघ-विस्फोटेन समुत्पन्नस्य आकस्मिक-जलप्रलयस्य कारणेन बृहद्रूपेण विनाशः अभवत्। आपत्प्रबन्धन-दलानि स्थले उद्धार-कार्येषु सक्रियरूपेण संलग्नानि सन्ति । वार्ताहरैः सह वार्तालापं कुर्वन् मुख्यमन्त्री पुष्करसिंह-धामी अस्याः घटनायाः विषये दुःखं प्रकटितवान्।

श्रीधामी अवदत् यत्, प्राथमिकतायाः आधारेण जनाः सुरक्षित-स्थानेषु स्थानान्तरिताः, स्थितिः च निरन्तरं निरीक्ष्यते । प्रशासनं पूर्णतया सज्जः अस्ति, प्रभावित-नागरिकाणां यथासम्भवं सहाय्यं करिष्यते ।

### अमितशाहः-उत्तरकाशी

गृहमन्त्री अमितशाहः अद्य उत्तराखण्डस्य मुख्यमन्त्रिणा सह धाराली-ग्रामे जातायाः आकस्मिक-जलाप्लवस्य घटनायाः विषये चर्चितवान्। सोशल-मीडिया इत्यत्र स्वकीये सन्देशे श्रीशाहः संसूचितवान् यत् समीपस्थानि त्रीणि भारत-तिब्बत-सीमा-आरक्षि-दलानि चत्वारि च राष्ट्रियापत्-प्रतिक्रिया-बलानि घटनास्थलं प्रति प्रेषितानि सन्ति अपि च दलानि शीघ्रमेव उद्धारकार्येषु प्रवृत्तानि भविष्यन्ति।

**<u>भारत-फिलिपीन्स-सन्धिपत्राणि</u>**

अद्य प्रधानमन्त्रिणः नरेंद्र-मोदिनः फिलीपींसदेशस्य राष्ट्रपतेः फर्डिनेंड-रोमुलडेज-मार्कोस -जूनियर इस्यस्य च उपस्थितौ फिलिपीन्स्-भारतयोः मध्ये नव-सन्धि-पत्राणाम् आदानप्रदानम् अभवत् । भारत-फिलिपीन्स-देशयोः मध्ये रणनैतिक-सहभागित्वम्, आपराधिकविषयेषु परस्परविधिसहाय्यं , रक्षा, विज्ञानप्रौद्योगिकी चेत्यादिषु क्षेत्रेषु सन्धिपत्राणि हस्ताक्षरितानि । प्रसारमाध्यमान् सम्बोधयन् प्रधानमन्त्री नरेन्द्रमोदिवर्यः अवदत् यत् फिलिपीन्स-देशस्य राष्ट्रपतेः यात्रायाः विशिष्टं महत्त्वं वर्तते यतः भारत-फिलिपीन्स-देशौ स्वकीयानां राजनैतिकसम्बन्धानां पञ्चसप्तति-वर्षाणि आचर्येते ।

श्रीमोदी पुनः अवदत् यत् द्वयोः देशयोः मध्ये सम्बन्धाः प्राचीनकालात् एव सन्ति। पहलगाम्-आक्रमणस्य दृढतया निन्दां कर्तुं, आतङ्कवादं विरुद्धं भारतेन सह स्थातुं , भारतस्य समर्थनाय च सः फिलिपीन्स-देशस्य राष्ट्रपतिं प्रति कृतज्ञतां प्रकटितवान्।

श्रीमोदी-वर्यः अवदत् यत् विकास-सहभागित्वस्य अन्तर्गतं भारतं फिलिपीन्स-देशौ त्वरित-प्रभाव-परियोजनानां सङ्ख्याः वर्धयिष्यतः । सः अवदत् यत् फिलिपीन्स्-देशे सोवर्न-डेटा-क्लाउड इत्यस्य विकासे अपि भारतं सहयोगं करिष्यति ।

**<u>संसत्-स्थगनम्</u>**

बिहारे मतदातृ-सूच्याः विशिष्ट-गहन-संशोधनं समेत्य अन्येषु विविधि-विषयेषु चर्चायाः याचनं कुर्वन्तां विपक्षिदलानां विरोधप्रदर्शनानन्तरं संसदः द्वयोः सदनयोः कार्याचरणम् अद्य स्थगितम् अभवत् । प्रथमस्थगनस्य अनन्तरं लोकसभा-राज्यसभयोः कार्याचरणं पूर्णदिवसाय स्थगितम् अभवत् । स्थगनानन्तरं यदा लोकसभायाः सदस्याः द्विवादने एकत्रिता अभवन् ,तदा विपक्षि-दलानि उच्चैर्घोषम् आचरितवन्तः सदनमध्ये च आगतवन्त । पीठासीनाधिकारी अकथयत् यत् सर्वकारः प्रत्येकं विषयमधिकृत्य चर्चायै सज्जः अस्ति । सः प्रोक्तवान् यत् प्रदर्शनकारिणः सदस्यानां आचरणं संसदीय-शिष्टाचारस्य अनुगुणम् उचितं न वर्तते । विरोधमध्ये , लोकसभया गोवा-राज्यस्य विधानसभा-क्षेत्रेषु अनुसूचित-जनजातिनां प्रतिनिधित्वस्य पुनः-समायोजन-विधेयकं इति पारितम् । विधेयकस्य उद्देश्यम् अनुसूचित-जनजातिनां सदस्यानां प्रभावात्मिकायै लोकतांत्रिक-सहभिगितायै निर्वाचनासनानाम् आरक्षणं सक्षमं कर्तुं , गोवा-राज्यस्य विधानसभायां निर्वाचनासनानां पुनः समायोजनस्य च प्रावधानं विधातुम् अस्ति । पीठासीनाधिकारिणः पौनः पुन्येन प्रार्थनायाः अनन्तरम् अपि , प्रदर्शनकारिभिः सदस्यैः स्वकीयः विरोधः सततं प्रचालितः, येन सदनं पूर्णदिवसाय स्थगितं जातम् । एतादृशः एव घटनाक्रमः राज्यसभायाम् अपि द्रष्टुमागतः । यदा सदनं द्विवादने पुनः समारभत् , तदा विपक्षि-दलानि विशिष्ट-गहन-संशोधनं इति विषयमधिकृत्य चर्चायैः याचनां कुर्वन्ती विरोध-प्रदर्शनं अकुर्वन् । उपसभापतिः हरिवंशः अकथयत् यत् संसदः सदस्यत्वेन केनापि संसदीय-मानकानां नियमानां पालनं विधातव्यम् । तेन चिन्ता प्रकटिता यत् प्रावृट-सत्रे सदनं किमपि महत्वपूर्णं कार्यं न कर्तुम् अशक्नोत् । विरोधमध्ये, राज्यसभया अस्य मासस्य त्रयोदशदिनाङ्कात् मणिपुरे राष्ट्रपति-शासनं षट्-मासं यावत् वर्धितुं वैधानिक-प्रस्तावः ध्वनि-मतैः पारितः ।

## राष्ट्रियजनतान्त्रिक-ग्रन्थिबन्धनम्-उपवेशनम्

अद्य नवदिल्ल्यां संसत्भवन-परिसरे एन-डी-ए इति राष्ट्रियजनतान्त्रिक-ग्रन्थिबन्धनस्य संसदीयदलस्य उपवेशनम् अभवत् । प्रधानमन्त्री-नरेन्द्रमोदी, रक्षामंत्री-राजनाथसिंहः, गृहमन्त्री अमितशाहः, भाजपादलाध्यक्षः जे. पी. नड्डाः ,एन्. डी. ए-दलस्य अन्ये सदस्याः चापि अस्मिन् उपवेशने उपस्थिताः आसन्। उपवेशने आपरेशन्-सिन्दूर् , आपरेशन-महादेव इत्येतयोः अभियानयोः सफलतायाः कृते एन्. डी. ए इति दलस्य सांसदाः प्रधानमन्त्रिणः मोदी-वर्यस्य अभिवादनं कृतवन्तः । सशस्त्रबलानां भूमिकायाः, तेषां अविचल-प्रतिबद्धतायाः च प्रशंसां कुर्वन्तः एन्. डी. ए. दलस्य सांसदाः सर्वसम्मत्या एकं प्रस्तावम् अपि स्वीकृतवन्तः। पहलगाम्-आतङ्कि-आक्रमणे मृतानां कृते अपि शोकः प्रकटितः। प्रसारमाध्यमैः सह वार्तालापं कुर्वन्, केन्द्रीय-संसदीय-कार्यमन्त्री किरेन-रिजीजूः अवदत् यत् एन्. डी. ए. इत्यस्य सदस्याः राष्ट्रस्य पक्षतः सशस्त्रसेनायाः शौर्यम् अधिकृत्य तेषाम् अभिनन्दनं कृतवन्तः ।

## मोदी-शिवराज-लेख

प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य प्रोक्तं यत् निरन्तर-संशोधनेन कृषक-केन्द्रितैः उपक्रमैः कृषिक्षेत्रे स्थिरवृद्धिः अभवत्। कृषि-कृषक-कल्याण-मन्त्रिणा शिवराजसिंह-चौहानेन लिखितं एकं लेखं प्रकाशयता श्रीमोदिना प्रोक्तं यत् एतानि संशोधनकार्याणि सप्तचत्वारिंशदधिक-द्विसहस्रतमवर्ष-पर्यन्तं विकसित-भारतस्य निर्माणे प्रमुखानि भविष्यन्ति । स्वकीये लेखे श्रीचौहानवर्यः प्रोक्तवान् यत् कृषिः केवलं भारतीयार्थव्यवस्थायाः मेरुदण्डः एव न, अपितु आत्मनिर्भरस्य, सशक्तस्य च भारतस्य आधारः अस्ति। सः अवदत् यत् कृषिः कोटिशः जनानाम् आजीविकायाः आधारः अस्ति।

**।। इति वार्ताः।।**